# shivAstotram

# शिवास्तोत्रम्

## Document Information

Text title : shivAstotram

File name : shivAstotram.itx

Category : devii, pArvatI, aShTaka, devI

Location : doc_devii

Transliterated by : NA

Proofread by : NA

Source : Mahakalasamhita Kamakalakhanda (uttara) Patal 4, Verses 111-118

Latest update : June 8, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

January 23, 2022

*sanskritdocuments.org*

shivAstotram

# शिवास्तोत्रम्

शिवारूपधरे देवि कामकालि नमोऽस्तु ते ।
उल्कामुखि ललज्जिह्वे घोररावे शृगालिनि ॥ १॥

श्मशानवासिनि प्रेते शवमांसप्रियेऽनघे ।
अरण्यचारिणि शिवे फेरो जम्बूकरूपिणि ॥ २॥

नमोऽस्तु ते महामाये जगत्तारिणि कालिके ।
मातङ्गि कुक्कुटे रौद्रि कालकालि नमोऽस्तु ते ॥ ३॥ var कालिकालि

सर्वसिद्धिप्रदे देवि भयङ्करि भयावहे । var सर्वसिद्धिप्रदे भीमे
प्रसन्ना भव देवेशि मम भक्तस्य कालिके ॥ ४॥

संसारतारिणि जये जय सर्वशुभङ्करि ।
विस्रस्तचिकुरे चण्डे चामुण्डे मुण्डमालिनि ॥ ५॥

संहारकारिणि क्रुद्धे सर्वसिद्धिं प्रयच्छ मे ।
दुर्गे किराति शवरि प्रेतासनगतेऽभये ॥ ६॥

अनुग्रहं कुरु सदा कृपया मां विलोकय ।
राज्यं प्रयच्छ विकटे वित्तमायुः सुतान् स्त्रियम् ॥ ७॥

शिवाबलिविधानेन प्रसन्ना भव फेरवे ।
नमस्तेऽस्तु नमस्तेऽस्तु नमस्तेऽस्तु नमो नमः ॥ ८॥

इत्येतैरष्टभिः श्लोकैः शिवास्तोत्रमुदीरयेत् ।

इत्यादिनाथविरचितायां महाकालसंहितायां कामकलाखण्ड्यां
उत्तरीभागे शिवाबलिप्रयोगो नामे चतुर्थपटलान्तर्गतं
शिवास्तोत्रं सम्पूर्णम् ।

Verses 111-118 Mahakalasamhita Kamakalakhanda (uttara) Patal 4

NA

*shivAstotram*

pdf was typeset on January 23, 2022

Please send corrections to *sanskrit@cheerful.com*